प्रवेश सं० ७८४०

विषय: धर्मशास्त्रम्

क्रम सं० १२

नाम कालनिर्णयकारिका

ग्रन्थकार माधवाचार्य:

पत्र सं० ३-४

श्लोक सं०

अक्षर सं० (पंक्तौ) ४१

पंक्ति सं० (पृष्ठे) १२

आकार: ९ X ३·६

लिपि: दे·ना·

आधार: का०

वि० विवरणम् अपूर्णा

12171 द्वि·१५९४

पी० एस० यू० जी०--७७ एम० सी० ई०--१९५१--५०.०००

Indira Gandhi National Centre for the Arts

प्र. सं. ५८४०

दूर्वाष्टमीतुयुक्तापिसर्वविद्धाविधीयते।पक्षद्वयेपितत्रैवशिवशक्तिमहोत्सवे॥६२॥ज्येष्ठर्क्षयोगेपूर्वैवग्रा
ह्याज्येष्ठाव्रततिथिः।मध्याह्नादूर्ध्वमृक्षंचेत्परेद्युःसाप्रशस्यते॥६३॥ज्येष्ठर्क्षभावोनुराभ्यांयोगोयस्यासुदु
र्लभः।जयंत्याख्यव्रतंभिन्नंकृष्णजन्माष्टमीव्रतात्॥६४॥शुद्धाचसप्तमीविद्धेत्येवंजन्माष्टमीद्विधा।सप्तमीव
र्जिताशुद्धाविद्धात्वशुद्धान्यथाभवेत्॥६५॥शुद्धायांनास्तिसंदेहोविद्धायांत्रिविधेष्यते।निशीथयोगःपूर्वेद्युःपरेद्यु
र्द्वियोःकृत।एवंवैप्रथमेपक्षेपरेवोत्तरपक्षयोः।अष्टमीरोहिणीयुक्ताजयंतीसाचतुर्विधा॥६७॥शुद्धाशुद्धाधि
के.सैवंविद्धाविद्धाधिकेतिच।शुद्धायामपिविद्धायांनसंभाव्योत्तरातिथिः॥६८॥शुद्धाधिकायांयोगस्याद्देक
स्मिन्वादिनद्वये।नैकयोगस्तिसंदेहोद्वियोगेप्रथमंदिनं॥६९॥सदानिशीथपश्चाद्वेत्युत्तमोमध्यमोऽधमः।योगस्त्रिधापि
पूर्वेद्युःसंपूर्णत्वादुपोषणं॥७०॥विद्धाधिकायामप्येकदिनयोगेसमुच्यते।द्वयोर्योगस्त्रिधाभिन्नोनिशीथोर्द्ध्वतोम
ध्यतः॥७१॥तद्वान्तिदिनएकस्मिन्नुभयोर्नोभयोरिति।एकस्मिन्नुत्तरदिनेस्यात्पक्षयोरंत्ययोःपरं॥७२॥बुधेसोमेजयंतीव
द्वासातिफलप्रदा।तिथ्यृक्षयोर्द्वयोरंतउत्तमंपारणंभवेत्॥७३॥एकस्यानेमध्यमंस्यादुत्सवांतेधमंस्मृतं।यस्मिन्वर्षेज
यंत्याख्ययोगोजन्माष्टमीतदा।अंतर्भूताजयंत्यांस्यादृक्षयोगप्रशस्तितः।नवमीपराविद्धैवपक्षयोरुभयोरपि॥७५॥
मध्याह्नेरामनवमीपुनर्वसुसमन्विता।ग्राह्यानैवाष्टमीयुक्तासनक्षत्रापिवैष्णवैः।७६॥सर्वात्तिरास्तुकाःदशम्येवंव्यवस्थिता॥

Indira Gandhi National Centre for the Arts

जयंतीव्रतवन्नित्यंकाम्यंचैकादशीव्रतं।अरुणोदयवेधोत्रवेधःसूर्योदयेतथा।उक्तौद्वौदशमीवेधौवैष्णवस्मार्तयोः क्र
मात्॥८॥कलाकाष्ठादिवेधोपियास्वोत्त्रिमुहूर्तवत्।वैखानसाद्यागमोक्तदीक्षांप्राप्ताहिवैष्णवः॥९॥किंचात्यज्या
वैष्णवेनशुद्धाप्याधिक्यसंभवे।एकादशीद्वादशीवाधिकावेत्यन्यतादिनं॥१०॥पूर्वग्राह्येत्तरस्यादितिवैष्णवनिर्ण
यः।एकादशीद्वादशीचेत्तुभयंवर्धतेयदा॥११॥तदासर्वैर्दिनंत्याज्यंस्मार्तैर्याह्यपरंदिनं।द्वयोर्वृद्धौपूर्वेवशुद्धाविद्धापि
सायदि॥१२॥एकादशीमात्रवृद्धौगृहियत्योर्व्यवस्थितः।उपोष्यागृहिभिःपूर्वायतिभिस्तूत्तरातिथिः॥१३॥द्वादशीमात्र
वृद्धौतुशुद्धाविद्धव्यवस्थिते।शुद्धापूर्वोत्तराविद्धास्मार्तैर्निर्णयईदृशः॥१४॥श्रवणेनयुताचेस्याद्द्वादशीसाहिवैष्णवी।
स्मार्तैश्चोपोषणीयास्यात्यजेदेकादशीतदा॥१५॥उपवासव्रतादन्यव्रतेसाधर्मुहूर्तकैः।सप्तभिर्दशमीविद्धामतामेका
दशीसजेत्॥१६॥द्वादशीपूर्वविद्धैवव्रतेषुनिखिलेष्वपि।शुक्लात्रयोदशीपूर्वापराह्णव्यापिनीत्रयोदशी।अलाभेसापिपूर्वे
वपरानेगत्रयोदशी।याशुक्लागस्त्यतःपूर्वाग्राह्यातांसापराह्णिकी॥१७॥ननुदृश्युत्तराशुक्लापूर्वाह्णास्मात्चतुर्दशी।उदये
द्विमुहूर्तापियाव्याप्नंतव्रतेतिथिः॥१८॥शुक्लापिरात्रियुक्तास्यात्चैत्रश्रावणमासयोः।शुक्लासर्वापिपूर्वैवयदिस्याद्
पराह्णिकी॥१९॥प्रदोषेवानिशीथेवाद्वयोर्वायाप्तिसाभवेत्।शिवरात्रिव्रतेतत्रद्वयोःसत्त्वाप्रशस्यते।तदभावेनिशी २
थेकव्याप्तापिपरिगृह्यतां॥तस्याश्चासंभवेग्राह्याप्रदोषव्यापिनीतिथिः॥२१॥तिथ्यंतेपारणंयामत्रयादर्वाक्समापने।
अन्यथापारणंप्रातरन्यतिथ्युपवासवत्॥२२॥सर्वविद्धैवसावित्रीव्रतेपंचदशीतिथिः।नाद्योष्टादशभंतस्यस्युश्चेत्तत्रपरेहनि।
॥२४॥

अन्[illegible]आग्यदिपर्वसंधिःकृत्वातुतस्मिन्प्रकृतिंविकृत्या।तत्रैवयागःपरतोयदिस्यात्तस्मिन्विकृत्या[illegible]कृतिःपरेद्युः॥१॥ ॥

व्रतानांदानानिसर्वाणिपरेहन्येवसर्वदा।श्राद्धपराह्णकालीनोदर्शआह्निकवन्मतः।दिनद्वयेप्येकदेशेव्याप्तौग्राह्येमहत्त्वतः।
तुल्यत्वंचैदेकदेशेक्षयेपूर्वोन्यथोत्तरः॥२५॥कृत्स्नव्याप्तोद्वयोरह्णोःकृत्तरास्तिथिवृद्धितः।साम्यनाशेव्यवस्थास्यात्तस्या
श्चेदपराह्णयोः॥२७॥पूर्वेद्युःसाग्निकाःकुर्युरुत्तरेद्युर्नग्निकाः।पर्वप्रतिपदोःसंधिर्मध्याह्नेवाततःपुरा॥२८॥अन्वाधानं
पूर्वदिनेयागःसंधिदिनेभवेत्।ऊर्ध्वंमध्याह्नतःसंधावन्वाधानंतुतद्दिने॥२९॥इष्टिंपरदिनेकुर्यादन्योवाजसनेयिनःप
क्षवाजसनेयीस्यात्तस्यसंधिदिनात्पुरा॥३०॥नक्वाप्यन्वाहितिःकिंतुसदासंधिदिनेहिसा।संधिश्चेत्संगवादूर्ध्वंप्राक्पर्या
वर्तनाद्रवेः॥१॥सापौर्णमासीविज्ञेयासद्यस्कालविधौतिथिः।वृद्धिःप्रतिपदायास्तितदूर्ध्वंपर्वणिक्षिपेत्॥२॥तृयस्या
र्धंतथाक्षिप्त्वासंधिनिर्णायितासदा।बौधायनमतेदर्शश्राद्धंचेष्टिर्विशेष्यते॥३॥द्वितीयात्रिमुहूर्तांचेत्स्यात्तिपद्यापरा
ह्णिकी।अन्वाधानंचतुर्दश्यांदर्शस्वल्पपिवर्जयेत्॥४॥दर्शश्राद्धंतदाकार्यमितिबोधायनोदितं।इष्ट्यादिविकृतिःसर्वा
पर्वण्येवेतिनिर्णयः॥५॥पंचमेतुप्रकरणेपूर्वार्धेमादिनिर्णयः।उत्तरार्धेकालभेदात्कर्मभेदोपदेशनं॥६॥यस्मिन्नस्त
मियान्नानुःस्तन्नक्षत्रमुपोषणे।मुख्यंतस्याऽसंभवेतुग्राह्यंतत्प्रनिशीथयुक्॥७॥उपवासेयदृक्संस्यात्तद्दिनेकेऽभयोयाः।
उदयेत्रिमुहूर्तस्थंनक्षत्रंव्रतदानयोः।दिनद्वयेतथासत्तुपूर्वस्याद्बलवत्त्वतः।श्रवणंतूत्तरंग्राह्यमुपकारणकर्मणि॥२॥
पित्र्येतुतिथिवत्सर्वेनिर्वृत्तस्यविनिर्णयः।पूर्वस्यादुपवासादौचुत्तरोव्रतदानयोः॥१०॥योगश्राद्धकर्मकाल[illegible]परि
ग्रहणं॥

Indira Gandhi National
Centre for the Arts

राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु।स्नानदानादिकंकार्यंनिशिकाम्यव्रतेषुचेतियाज्ञवल्क्यः॥ ॥ द्वि: १५९४

कालनि र्णयकरणंयद्दिनेतच्चतुर्याम्यंरात्रौयदातदा।दिनद्वयैकभक्ताभ्यामुपवासःप्रसिध्यति।वारेषुसंशयाभावाद्ग्रहीतव्यंयथास्थितं
४ य॥ आसन्ननाड्यःसंक्रांतेःपुण्यास्नानादिकर्मसु।वरेषुकर्कटेपूर्वामकरेविंशतिःपराः।वर्त्तमानेतुलामेषेनाड्यस्तूभयतोदश।
वृषभादौस्थिरेपुण्याःप्राक्पश्चादपिषोडश।मिथुनादौद्विस्वभावेउत्तराःषष्टिनाडिकाः।अहःसंक्रमणेरात्रावनुष्ठान
निषेधतः।उक्तौकालौव्यवस्थाप्यौतद्वत्पूर्वपश्चिमौ।रात्रौसंक्रमणेभानोर्दिनार्धस्नानदानयोः।अर्धरात्रादधस्त
स्मिन्मध्याह्नस्योपरिक्रिया।ऊर्ध्वंसंक्रमणेचोर्ध्वमुदयात्प्रहरद्वयं।पूर्णेचेदर्धरात्रेतुयदासंक्रमतेरविः।प्राहुर्दिनद्वयं
पुण्यमुक्त्वामकरकर्कटौ।कर्कटेमकरेरात्रावप्याचाराद्नुष्ठितिः।पूर्णिमाप्रतिपत्संधौराहुःसंपूर्णमंडलं।ग्रसतेचे
द्गमर्केचपर्वप्रतिपदंतरे।ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते।मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयते।सूर्यग्रहेतुना
श्नीयात्पूर्वंयामचतुष्टयं।चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विना।अपराह्णेनमध्याह्नेमध्याह्नेनतुसंगवे।भुंजीतसं
गवेचेत्स्यान्नपूर्वंभुक्तिमाचरेत्।ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाचरेत्।ग्रस्तावेवास्तमानंतुरवींद्वोःप्राप्नुतोयदि।तयोः
परेद्युरुदयेस्नात्वाभ्यवहरेन्नरः।त्रयोदश्यादितोवर्ज्यंदिनानांनवकंध्रुवं।मंगलेषुनसर्वेषुग्रहणेचंद्रसूर्ययोः।द्वाद ।कालनि ४
श्यादिस्तृतीयांतोवेधइंदुग्रहेस्मृतः।एकादश्यादिकेसौरश्चतुर्थ्यंतःसकीर्तितः।खंडग्रहेतयोःप्रोक्तेमुक्तेयत्रदिनद्वयम्
नित्यनैमित्तिकेजप्यहोमयज्ञक्रियासुच।उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यते।ईदृशानियमन्यायैर्विचारात्तुमिहोद्यतः।
तमेवनिर्णयंशास्त्रंयाभ्याकर्तुमुद्यमः।१२८॥ ॥इतिश्रीमाधवाचार्यकृताःकालनिर्णयकारिकाःसमाप्ताः॥ ॥श्रीरस्तु॥

Indira Gandhi National Centre for the Arts